This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥

श्रीगणेशाय नमः॥ विश्वेश्वरं सांबमूर्त्तिं प्रणिपत्य गिरं गुरुं
श्रुहितां कुर्वे तर्कसंग्रहदीपिकां ॥१॥ चिकीर्षितस्य ग्रंथस्य निर्वि
समाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं इष्टदेवता
र रूपं मंगलं शिष्यशिक्षार्थं ग्रंथादौ निबध्नन् चिकीर्षितं प्रतिज
निधायेति॥ ननु मंगलस्य समाप्तिसाधनत्वं नास्ति। मंगले कृतेपि किरणा
वल्यादौ समाप्त्यदर्शनात्। मंगलाभावेपि कादंबर्यादौ समाप्तिदर्शना
त्। अन्वयव्यतिरेकव्यभिचारादिति चेन्न। किरणावल्यादौ वि
घ्नबाहुल्यात्समाप्त्यभावः। कादंबर्यादौ ग्रंथाद्बहिरेव मंगलं
कृतं। अतो न व्यभिचारः। ननु मंगलस्य कर्त्तव्यत्वे किं प्रमाण

॥१

तर्कसंग्रह
टिका॥

Acc. No. ~~320~~ M1486
Title - तर्कसंग्रह दीपिका. (संपूर्ण)
Author - अन्नम् भट्ट.
Date - ?
Subject - न्याय.
folio - 26
xerox - 50

K K S U LIBRARY
RAMTEK
441 106
M.1486
Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितिचेन्न। शिष्टाचारानुमितश्रुतेरेवप्रमाणत्वात्। तथा हि मंगलं वेदबोधि
तकर्त्तव्यताकं अलौकिकाविगीतशिष्टाचारविषयत्वात्। दर्शादिवत्।
भोजनादौव्यभिचारवारणाय अलौकिकेति॥ रात्रिश्राद्धादौव्यभिचारवा
रणाय अविगीतेति। शिष्टपदस्पष्टार्थं। नकुर्यान्निष्फलं कर्मेति जल
ताउनादेरपि निषिद्धत्वात् इति॥ तर्क्यंते प्रतिपाद्यंते इति तर्काः द्रव्य
दिसप्तपदार्थास्तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियत इत्यर्थः। कस्मै
प्रयोजनायेत्यत आह॥ सुखबोधायेति॥ सुखेन अनायासेन बोधः द्र
पदार्थज्ञानं तस्मादित्यर्थः। ननु बहुषु तर्कग्रंथेषु सत्सु किमद्रव्यं। आ
र्षः ग्रंथः क्रियते इत्यत आह बालानामिति॥ तेषां अतिक्षुषप्रमायां
बालानां बोधो न भवतीत्यर्थः। ग्रंथग्रहणधारणपरान्याभावरूपं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तनंधयः किंकृत्वा क्रियत इत्यत आह। निधायेति॥ विश्वेश्वरं तद्धं। द्रव्यत्व
तारं हृदि निधाय नितरां स्थापयित्वेत्यर्थः॥ अथ पदार्थान्विभजते नमव्याप्तिः॥
पदस्य अर्थः पदार्थ इतिः व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्यस्य लक्ष्यमा
नुविभागादेव सप्तत्वे लब्धे सप्तग्रहणं व्यर्थमिति चेन्न। अधिकसंख्यक्षणं
वच्छेदार्थकत्वात्॥ नन्वतिरिक्तपदार्थः प्रमितो वा न वा॥ नाद्यः॥ प्रमितस्य नि
षेधायोगात्। न द्वितीयः। प्रतियोगिप्रमितिं विना निषेधानुपपत्तेः। इति चे
न्न। पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थकत्वात्। ननु सप्ता
न्यतमत्वं सप्तभिन्नभिन्नत्वमिति वाच्यं॥ सप्तभिन्नस्य अप्रसिद्धत्वात्सप्तान्यत
त्वं कथमिति चेन्न। द्रव्यादिसप्तान्यतमत्वं द्रव्यादिभेदसप्तकाभाव
वत्त्वमियुक्तत्वात्। एवमग्रेपि द्रष्टव्यं॥ द्रव्याणि विभजते॥ तत्रेति॥ तत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रयादिमध्ये द्रव्याणि नवैवेत्यन्वयः। तानि कानि इत्यत आह पृथिवीत्यादि।
ननु तमसो दशमद्रव्यस्य विद्यमानत्वात्कथं नव द्रव्याणि॥ तथा हीति॥ नीलं
तमश्चलतीति अबाधितप्रतीतिबलात् नीलरूपाधारतया क्रियाधारतया
च द्रव्यत्वं तावत्सिद्धं॥ तत्र तमसो नाकाशादिपंचकेंतर्भावः। रूपवत्वात्। अत
एव न वायौ। स्पर्शाभावात्। सदागतिमत्वाच्च॥ नापि तेजसि। भास्वररूपा
भावात्॥ उष्णस्पर्शाभावात्च। नापि जले शीतस्पर्शाभावात्। नीलरूपाश्रय
त्वाच्च। नापि पृथिव्यां। गंधाभावात्। स्पर्शरहितत्वाच्च तस्मात्तमो दशमद्र
व्यमिति चेन्न। तमसः तेजोभावरूपत्वात्। तथा हि॥ तमो न रूपिद्रव्यं। आ
लोकासहकृतचक्षुर्ग्राह्यत्वात्। आलोकाभाववत्॥ रूपिचाक्षुषप्रमायां
आलोकस्य सहकारित्वात्। तस्मात्प्रौढप्रकाशकतेजःसामान्याभावरूपं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीलंतमश्चलतीति प्रत्ययो भ्रांतिरेव अतो न वैव द्रव्याणीति सिद्धं। द्रव्यत्व
जातिमत्वं गुणवत्वं वा द्रव्यसामान्यस्य लक्षणं। लक्ष्यैकदेशावर्त्तनमव्याप्तिः॥
यथा गोः कपिलत्वं। लक्ष्यवृत्तित्वेनातिव्याप्तिः। यथा गोः शृंगित्वं। लक्ष्यमा
त्रावर्त्तनमसंभवः। यथा गौरकशफवत्वं। एतद्दूषणत्रयरहितो धर्मो लक्षणं।
स एव आसाधारणधर्म इत्युच्यते। यथा गोर्लक्षणं सास्नादिमत्वं। लक्ष्यतावच्छे
दकसमनियतत्वं आसाधारणत्वं व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनं॥ व्या
वर्त्तकस्यैव लक्षणप्रयोजकत्वेन देयं। व्यावृत्तेरपि व्यवहारसाधनत्वात्। ननु गु
नवत्वं न द्रव्यलक्षणं आद्यक्षणोत्पन्नविनष्टद्रव्ये अव्याप्तिरिति चेन्न। गुणस
मानाधिकरणसत्ताभिन्नजातिमत्वस्य विवक्षितत्वात्॥ न चैवमपि एकं रूपं रसा
त्पृथगिति व्यवहाराद्रूपादावतिव्याप्तिरिति चेन्न। एकार्थसमवायादेव तादृश

त्वे व्यावृत्तावभिधेयत्वात्तौ च अतिव्याप्तिवारणाय तद्भिन्नत्वं धर्मविशेषणं देयं। व्यवहा
रस्यापि लक्षण ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यवहारोपपत्तौ गुणे गुणानंगीकारात्॥ गुणं विभजते॥ रूपेति॥ द्रव्यकर्मभि
न्नत्वे सति सामान्यवान् गुणः॥ गुणत्वजातिमान् वा॥ ननु लघुत्वमृदुत्वकठिन
त्वादीनां विद्यमानत्वात् कथं चतुर्विंशतिगुणा इति चेन्न॥ लघुत्वस्य गुरुत्वाभावरू
पत्वात्॥ मृदुत्वकठिनत्वयोरवयवसंयोगविशेषरूपत्वात्॥ कर्म विभजते॥
उत्क्षेपणेति॥ संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म॥ कर्मत्वजाति
मद्वा॥ भ्रमणादिनामपि गमने अंतर्भावात्॥ न पंचत्वविरोधः॥ शेषं विभजते॥
नित्यद्रव्येति॥ पृथिव्यादिचतुष्टयस्य परमाणवः आकाशादिपंचकं च कं
च नित्यद्रव्याणि॥ समवायस्य भेदो नास्तीत्याह॥ समवायस्त्विति॥ अभावं
विभजते॥ प्रागभाव इति॥ अत्रोद्देश्यक्रमानुसारात् प्रथमं पृथिव्याः लक्षणमाह॥
गंधवतीति॥ नाम्नापदार्थसंकीर्तनमुद्देशः॥ उद्देशक्रमे च सर्वत्र इच्छैव नियामिका॥

॥ सामान्यं विभजते॥ परमिति॥ पर
॥ वृत्ति॥ अपरं न्यूनवृत्ति॥ स
॥ चतुष्टये जातिर्नास्ति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४॥

नमुसुरभ्यसुरभ्यवयवारब्धद्रव्येपरस्परविरोधेनगंधानुत्पादादव्याप्तिः॥
नचगंधस्वीकारात्नगंधप्रतीत्यनुपपत्तिरितिवाच्यं॥ अवयवगधस्यैव
तत्रप्रतीतिसंभवेनचित्रगंधानंगीकातत्रचित्रात्॥ किंचोत्पन्नविनष्टघटा
दावव्याप्तिरितिचेन्न॥ गंधसमानाधिकरणद्रव्यत्वापरजातिमत्वस्यविवक्षि
तत्वात्॥ ननुजलादावपिगंधप्रतीतेरतिव्याप्तिरितिचेन्न॥ अन्वयव्यतिरे
काभ्यांतत्रपृथ्वीगंधस्यैवभानांगीकात्। ननुतथापिकालस्यसर्वपदार्थाधा
रतयासर्वेषांलक्षणानांकालेअतिव्याप्तिरितिचेन्न। सर्वाधारताप्रयोज
ककालिकसंबंधभिन्नसंबंधेनलक्षणसत्वस्याभिमतत्वात्॥ पृथिवींवि
भजते॥ सेति॥ नित्यत्वंध्वंसाप्रतियोगित्वं। ध्वंसप्रतियोगित्वमनित्यत्वं॥
प्रकारांतरेणविभजते॥ पुनरिति॥ आत्मनोभोगायतनंशरीरं। यदेव

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छिन्नात्मनि भोगो जायते तद्भोगायतनं। सुखदुखान्यतरसाक्षात्कारो भोगः।
शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वे मि
न्द्रियत्वं। शरीरेंद्रियभिन्नो विषयः। एवं गंधवच्छरीरं पार्थिवशरीरं। गंध
वदिंद्रियं पार्थिवेंद्रियं। गंधवान्विषयः पार्थिवविषयः॥ इति तत्तल्लक्षणं
बोध्यं॥ पार्थिवशरीरं दर्शयति॥ शरीरमिति॥ इंद्रियं दर्शयति॥ इंद्रियमिति॥
गंधग्राहकमिति प्रयोजनकथनं। घ्राणमिति संज्ञा नासाग्रवतीति आश्र
योक्तिः एवमुत्तरत्र ज्ञेयं॥ पार्थिवविषयं दर्शयति॥ मृदिति॥ अपां लक्षणमाह॥
शीतेति॥ उत्पन्ने विनष्टे जलेऽव्याप्तिवारणाय शीतस्पर्शसमानाधिकरणद्र
व्यत्वापरजातिमत्त्वेतात्पर्य। शीतं शिलातलमित्यादौ जलसन्निधानादेव त
द्भानमिति नाव्याप्तिः। अन्यत्सूर्ववत्व्याख्येयं। तेजसो लक्षणमाह। उष्णेति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥

भौ २

उक्तं जलमिति प्रतीतेस्तेजःसंबंधानुविधायित्वात्। नातिव्याप्तिः॥ विषयं वि
भजते॥ भौ॥ ति॥ ननु सुवर्णं पार्थिवं पीतत्वाद्गुरुत्वात्। हरिद्रावत्। इति चेन्न। अ
त्यंतानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृतेनाशादर्श
तेनासति प्रतिबंधके पार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधा
रणात्। सुवर्णस्यात्यंतानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थि
वत्वानुपपत्तेः। तस्मात्पीतद्रव्यस्य द्रवत्वनाशप्रतिबंधकत्वेन द्रवद्रव्यांतरसिद्धौ
नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः। रूपवत्तया वाय्वदेह्यनंतर्भावात्
तैजसत्वसिद्धिः। तस्योष्णस्पर्शभास्वररूपयोरुपष्टंभकपार्थिवरूपस्पर्शाभ्यां
प्रतिबंधादनुपलब्धिः। तस्मात्सुवर्णं तैजसं॥ वायुं लक्षयति॥ रूपेति॥ आका
शादावतिव्याप्तिवारणाय स्पर्शवदिति। पृथिव्यादौ तदर्थं रूपरहितेति॥ ननु
प्राणस्य कुत्रांतर्भाव इत्यत आह। शरीरेति॥ स चेति। एक एव प्राणः स्थानभेदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राणापानादिशब्दैर्व्यपदिश्यतेइत्यर्थः॥स्पर्शानुमेयोवायुः।तथाहिः॥यो
यंवायोवातिसतिअनुष्णाशीतस्पर्शोभासतेसस्पर्शः क्वचिद्धाश्रितः।गुणत्वात्।
रूपवत्।नचास्यपृथिव्याश्रयः।उद्भूतस्पर्शवतः पार्थिवस्योद्भूतरूपवत्त्वनि
यमात्।नजलतेजसोः अनुष्णाशीतत्वात्॥नच विभुचतुष्टयस्य।सर्वदोपल
ब्धिप्रसंगात्।नमनसः।परमाणुस्पर्शस्यअतीन्द्रियत्वात्।तस्माद्यःप्रतीयमान
स्पर्शाश्रयःसवायुःननुवायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वात्।घटवदितिचेन्न॥
उद्भूतरूपवत्त्वस्योपाधित्वात्।यच्चक्वचेत्सतिबहिरिंद्रियजन्यप्रत्यक्षंतत्
रोद्भूतरूपवत्त्वमितिसाध्यव्यापकत्वं।पक्षेसाध्याव्यापकत्वं।नचैवंत्सवा
रिस्थतेजसोप्यप्रत्यक्षत्वापत्तिः॥इष्टत्वात्।तस्माद्परिशेषात्वायुरप्रत्यक्षः॥
इदानीकार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशक्रमःकथ्यते।ईश्वर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यचिकीर्षावशात्परमाणुषुक्रियाजायते।ततःपरमाणुद्वयसंयोगेसतिद्व्यणु
कमुत्पद्यते।त्रिभिर्द्व्यणुकैस्त्र्यणुकं।एवंचतुरणुकादिक्रमेणमहापृथिवीम
हापः महत्तेजःमहावायुःउत्पद्यते॥एवमुपन्नस्यकार्यद्रव्यसंज्ञितीर्षावशा
त्क्रियायापरमाणुद्वयविभागेसतिद्व्यणुकनाशः।
ततस्त्र्यणुकस्य।ततःचतुरणुकस्य।इत्येवंपृथिव्यादिनाशः।असमवायिकार
णनाशात्द्व्यणुकनाशः।समवायिकारणनाशात्त्र्यणुकनाशइतिसंप्र
दायः।सर्वत्रअसमवायिकारणनाशात्द्रव्यनाशइतिनवीनाः।किंपुनःपर मा
णुसद्भावेप्रमाणं।उच्यते॥जालसूर्यमरीचिस्थंसूक्ष्मंतमंयद्रजउपलभ्यतेत
त्सावयवं।चाक्षुषद्रव्यत्वात्।घटवत्त्र्यणुकावयोपिसावयवः।महद्घरंभकत्वात्।
नंवुचत्।योद्व्यणुकावयवःसएवपरमाणुः।सचनित्यः।कार्यत्वेअनवस्थाप्रसं
गात्।मेरुसर्षपयोःसाम्यप्रसंगस्मत्।सृष्टिप्रलयसद्भावेज्ञातायथापूर्वमक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लयत्व। इत्यादिश्रुतेः प्रमाणत्वात्। सर्वकार्यद्रव्यध्वंसः अवांतरप्रलयः।
सर्वभावकार्यध्वंसो महाप्रलय इति विवेकः आकाशलक्षयति॥ शब्दगुण
कमिति। नन्वाकाशमपि पृथिव्यादिवत्नानानेत्याह। तच्चैकमिति।
नेदंप्रमाणाभावादित्यर्थः। एकत्वादेवसर्वत्रशब्दोपलब्धेः। विभुत्वमंगीकर्त्त
व्यमित्याह। विभिति॥ सर्वमूर्त्तसंयोगित्वंविभुत्वं। मूर्त्तत्वंपरिच्छिन्नपरिमाण
वत्वंक्रियावत्वंवा। विभुत्वादेवआत्मवत्नित्यमित्याह। नित्यंचेति॥ कालंल
क्षयति॥ अतीतेति। सर्वाधारःकालः। सर्वकार्यनिमित्तकारणंच॥ दि
शोलक्षणमाहप्राचीति॥ दिगपिकार्यमात्रेनिमित्तकारणं॥ आत्मनोलक्षण
माह॥ ज्ञानेति॥ आत्मानंविभजते॥ सद्विशेषेति। परमात्मनोलक्षणमाह।
तत्रेति॥ नित्यज्ञानाधिकरणत्वमीश्वरत्वे। ननु ईश्वरसद्भावेकिंप्रमाणं। न
तावत्प्रत्यक्षं। तद्धिबाह्यमाभ्यंतरंवा। नाद्यः। अरूपिद्रव्यत्वात्। नांसः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनः सुखदुःखादिव्यतिरिक्तत्वात्। नाप्यनुमानं। लिंगाभावात्। नाप्यागमः। तथाविधश्रुतेरभावात्। इतिचेन्नाङ्कुरादिकंकर्त्रन्यं। कार्यत्वात्। घटवत्। इत्यनुमानस्यप्रमाणत्वात्। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वं। कल्प्यते॥ उपादानंसमवायिकारणं। सकलपरमाण्वादिसूक्ष्मदर्शित्वात्। सर्वज्ञत्वं। यः सर्वज्ञः सससर्वविद्। इत्यागमोपिस्वप्रमाणं॥ जीवस्यलक्षणमाह॥ जीवेति॥ सुखाद्याश्रयत्वं जीवस्यलक्षणं॥ ननुमनुष्योहं ब्राह्मणोहं इत्यादौ सर्वत्र अहंप्रत्ययेशरीरस्यैवविषयत्वात्। शरीरमेवआत्मेतिचेन्न। शरीरस्यआत्मत्वेकरपादिनाशेशरीरनाशात्। आत्मनोपिनाशप्रसंगात्॥ नापीं द्रियाणामात्मत्वं। योहं घटमद्राक्षंसोहमिदानींस्पृशामीत्यनुसंधानाभावप्रसंगात्। अन्यानुभूतेअर्थेअन्यस्यतु अनुसंधानायोगात्। तस्माद्देहेदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यव्यतिरिक्तोजीवः। दुखदुःखादिवैचित्र्यात्प्रतिशरीरं भिन्नः।
स्वनपरमाणुः शरीरव्यापिसुखानुपलब्धिप्रसंगात्॥ नापिमध्यम
परिमाणः। तथासति अनित्यत्वप्रसंगेनकृतशानोकृताभ्यागमप्रसंगात्।
तस्मान्नित्यो विभुर्जीवः॥ मनसोलक्षणमाह॥ सुखेति॥ स्पर्शरहितत्वेस
तिक्रियावत्वंमनसोलक्षणं॥ मनोविभजते॥ तच्चेति॥ एकैकस्य आत्मनः
एकैकमनः इत्यात्मनामनेकत्वात् मनसोप्यनेकत्वं इत्यर्थः॥ मरमाणुरू
पमिति॥ मध्यमपरिमाणत्वे अनित्यत्वंप्रसंगात् इत्यर्थः। ननुमनोविभुः
स्पर्शरहितद्रव्यत्वात् आकाशादिवदितिचन्न। मनसो विभुत्वे आत्मनः संयोग
स्यासमवायिकारणस्याभावात्। ज्ञानानुत्पत्तिप्रसंगात्। नचविभुद्वयस्य
संयोगोस्त्विति वाच्यं॥ सत्संयोगस्यनित्यत्वेनसुषुप्त्यभावप्रसंगात्। पुरीतद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥

तिरिक्तप्रदेशात्ममनःसंयोगस्यसर्वदाविद्यमानत्वात्। अनुत्वेतुयदात्मनःपुरी
ततिंप्रविशतितदासुषुप्तिः। यदानिःसरतितदाज्ञानोत्पत्तिरित्यणुत्वसिद्धिः॥
रूपंलक्षयति॥चक्षुरिति॥संस्वादावतिव्याप्तिवारणायमात्रपदं। रूपत्वेअ
व्याप्तिवारणायगुणपदं॥रूपंविभजते॥तच्चेति॥ननुअव्याप्यवृत्तिनील
लादिसमुदायएवंचित्ररूपमितिचेन्न॥रूपस्यव्याप्यवृत्तित्वनियमात्॥ननु
चित्रपटेअवयवरूपस्यप्रतीतिरितिचेन्न। रूपरहितत्वेनपटस्याप्रत्यक्षत्वप्र
संगात्॥नचरूपवत्समवेतत्वंप्रत्यक्षत्वेप्रयोजकं। गौरवात्। तस्मात्पटस्यप्रत्य
क्षत्वान्यथानुपपत्त्याचित्ररूपसिद्धिः। रसंलक्षयति॥रसनेति॥रसत्वेअ
तिव्याप्तिवारणायगुणपदं॥रसस्याश्रयमाह। पृथिवीति॥आश्रयंविभ
ज्यदर्शयति॥पृथिव्यामिति॥गंधंलक्षयति॥घ्राणेति॥गंधत्वेअतिव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टिवारणाय गुणपदं ॥ स्पर्शं लक्षयति । त्वगिति ॥ स्पर्शत्वे अतिव्याप्तिवारणाय
गुणपदं ॥ संयोगादावतिव्याप्तिवारणाय मात्रपदं ॥ पाकजमिति ॥ पाकस्तेजः
संयोगः । तेन पूर्वरूपं नश्यति रूपांतरमुत्पद्यत इत्यर्थः ॥ अत्र परमाणुष्वे
व पाकः । न द्व्यणुकादौ । आमनिक्षिप्तघटे परमाणौ रूपांतरोत्पत्तेश्चा
मघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः । तत्र परमाणवः समवायिकारणं ।
तेजःसंयोगः असमवायिकारणं । अदृष्टादिनं निमित्तकारणं । द्व्यणुकादि
रूपे कारणरूपं असमवायिकारणमिति पीलुपाकवादिनो वैशेषिकाः ॥
पूर्वघटस्य नाशं विनैव । वयविन्यवयवेषु परमाणुपर्यंतेषु युगपत् रूपांतरो
त्पत्तिरिति पिठरपाकवादिनो नैयायिकाः ॥ अत एव पार्थिवपरमाणुषु रूपा
दिकमनित्यमित्यर्थः अन्यत्र जलादावित्यर्थः ॥ नित्यगतमिति ॥ परमाणुषु
गतमित्यर्थः अनित्यगतमिति । द्व्यणुकादिनिष्ठमित्यर्थः । रूपादिचतुष्टयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उद्भूतंप्रत्यक्षं॥अनुद्भूतमप्रत्यक्षं॥उद्भूतत्वंप्रत्यक्षत्वप्रयोजकोधर्मः॥तद्भावः
अनुद्भूतत्वं॥संख्यांलक्षयति॥परिमाणंलक्षयति॥मानेति॥परिमाणंविभज
ते॥तद्द्वेति॥भावप्राधान्येनिर्देशः॥अणुत्वमहत्त्वंदीर्घत्वंह्रस्वत्वंचेत्यर्थः॥
पृथक्त्वंलक्षयति॥पृथगिति॥इदमस्मात्पृथगितिव्यवहारअसाधारण
कारणमित्यर्थः॥संयोगंलक्षयति॥संयुक्तेति॥इमौसंयुक्तौइतिव्यवहार
असाधारणहेतुरित्यर्थः॥संख्यादिलक्षणेषुसर्वत्रद्रव्यत्वादोअतिव्याप्ति
वारणायअसाधारणेति॥संयोगोद्विविधः॥कर्मजः॥संयोगजश्च॥आ
द्योहस्तक्रियायापुस्तकसंयोगः॥द्वितीयोहस्तपुस्तकसंयोगात्कायपुस्त
कसंयोगः॥अव्याप्यवृत्तिसंयोगः स्यात्तत्रभावसमानाधिकरणत्वंअव्या
प्यवृत्तेः॥विभागंलक्षयति॥संयोगेति॥कालादावतिव्याप्तिवारणाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुण इति॥ रूपादय इति व्याप्तिवारणाय संयोग विनाश इति॥ विभागोपि क
र्मजो विभाग श्च॥ अद्योहस्तपुस्तक विभागः॥ द्वितीयः कायपुस्तक विभागः।
परत्वापरत्वयोर्लक्षणमाह॥ परापरे इति॥ परव्यवहार असाधारणकारणं
परत्वं। अपरव्यवहारासाधारणकारणं अपरत्वं इत्यर्थः॥ परापरत्वे विभज
ते॥ ते द्वि वि धे इति। दिक्कृतस्योदाहरणमाह॥ दूरस्थे इति॥ कालकृतस्य
उदाहरणमाह॥ ज्येष्ठ इति॥ गुरुत्वेलक्षयति। आद्येति॥ द्वितीयादिप
तनस्य वेगासमवायिकारणत्वात्॥ वेगे अतिव्याप्तिवारणाय आद्येति॥
द्रवत्वंलक्षयति। स्यन्दनेति॥ स्पन्दनंस्रवणं तेजः संयोगजन्यंनैमित्तिकं॥
तद्भिन्नंसांसिद्धिकं। दृष्टियोनैमित्तिकमुदाहरति॥ घृतादाविति। तेजसिनैमि
त्तिकमुदाहरति॥ सुवर्णादाविति॥ स्नेहंलक्षयति॥ चूर्णेति॥ कालादाविति व्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिवारणायगुणेति॥रूपादावतिव्याप्तिवारणायचूर्णादिपिंडीभावेति॥
शब्दलक्षयति॥श्रोत्रेति॥शब्दत्वेऽअतिव्याप्तिवारणायगुणपदं॥रूपाद
वतिव्याप्तिवारणायश्रोत्रेति॥शब्दस्त्रिविधः॥संयोगजविभागजशब्द
जन्येति॥तत्राद्यःभेरीदंडसंयोगजन्यः॥द्वितीयोवृक्षेपाद्यमानेदलद्वयवि
भागजन्यश्चटचटशब्दः॥भेर्यादिदेशमारभ्यश्रोत्रपर्यंतंद्वितीयादिशब्दाः शब्द
जाः॥बुद्धेर्लक्षणमाह॥बुद्धिरितिजानामीत्यनुव्यवसायगम्यज्ञानत्वंबुद्धेर्ल
क्षणमित्यर्थः॥बुद्धिंविभजते॥स्मृतेर्लक्षणमाह॥संस्कारेति॥भावना
ख्यःसंस्कारः॥संस्कारध्वंसेऽतिव्याप्तिवारणायज्ञानमिति॥घटादिप्रत्यक्षे
ऽतिव्याप्तिवारणायसंस्कारजन्यमिति॥अनुभवंलक्षयति॥तद्भिन्नमिति॥
स्मृतिभिन्नज्ञानमनुभवइत्यर्थः॥अनुभवंविभजते॥सद्विविधइति॥यथार्थो
नुभवस्यलक्षणमाह॥तद्वतीति॥ननुघटेघटत्वमितिप्रमायामव्याप्तिः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घटत्वेघट भावादितिचेन्न।यत्रयत्संबंधोस्तितत्रतत्संबंधानुभवइत्यर्थात् घट
त्वेपिघटसंबंधोस्तितिनाव्याप्तिः॥सेवेति॥यथार्थानुभवएवशास्त्रेप्रमेत्युच्य
ते॥अयथार्थेलक्षयेति॥नहभावबलीति।ननुइदंसंयोगीतिप्रमायांअतिव्या
प्तिरितिचेन्न।यद्यवच्छेदेनयत्संबंधाभावःतद्यवच्छेनतत्संबंधज्ञानस्य
विरोधितत्वात्।संयोगाभावावच्छेदेनसंयोगज्ञानस्यभ्रमत्वात्॥सयो
गावच्छेदेनसंयोगसंबंधस्यसत्वान्नातिव्याप्तिः॥यथार्थेनुभवंवि
भजते।यथार्थेति॥प्रसंगात्प्रमाकरणंविभजते।वत्करणमितिप्रमा
करणमित्यर्थः॥प्रकारणंप्रमाणमितिप्रमाणसामान्यलक्षणमित्यर्थः॥
करणलक्षणमाह।असाधारणेति॥साधारणकारणेदिक्कालादौअ
तिव्याप्तिवारणायासाधारणेति॥कारणलक्षणमाह॥कार्येति॥
पूर्ववत्तिकारणमित्युक्तेरासभासावतिव्याप्तिःस्यात्तोनियतेति॥तावन्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११॥

त्रेकृते कार्ये अतिव्याप्तिः। अतः पूर्ववृत्तीति॥ ननु तंतुरूपमपि पटं प्रति का
रणं स्यात्। इति चेन्न॥ अन्यथा सिद्धत्वे सतीति विशेषणात्॥ अनन्यथा
सिद्धत्वं अन्यथा सिद्धिविरहः। अन्यथा सिद्धिश्च त्रिविधा॥ येन सहैव
यस्य यं प्रति पूर्ववृत्तित्वं अवगम्यते तं प्रति तदन्यथा सिद्धं॥ यथा तंतुना
तंतुरूपं तंतुत्वं च पटं प्रति। अन्यप्रतिपूर्ववृत्तित्वज्ञात एव यस्य यं प्रति पूर्ववृ
त्तित्वमवगम्यते तं प्रति तदन्यथा सिद्धं। यथा पटं प्रति आकाशस्य। अन्येत्राक्लृप्त
पूर्ववृत्तिन एव कार्यसंभवे तत्सहभूतं तदन्यथा सिद्धं॥ यथा पाकजस्थ
ले गंधं प्रति रूपप्रागभावस्य। एवं च अनन्यथा सिद्धनियतपूर्ववृत्तित्वं कार
णत्वं॥ कार्यलक्षणमाह॥ कार्यमिति॥ कारणं विभजते। कारणमिति॥
समकायिकारणलक्षणमाह॥ यत्समवेतमिति॥ यस्मिन् समवेतमित्यर्थः।

श्र ६

॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असमवायिकारणं लक्षयति ॥ कार्यणेति । कार्येणेत्येतदुदाहरति ॥ तंतुसयोग
इति ॥ कार्यणपटेनएकस्मिन्तंतौसमवेतत्वात्तंतुसंयोगः पटस्य असवायि
कारणं । इत्यर्थः । करणेनसहेत्येतदुदाहरति ॥ तंतुरूपमिति ॥ कारणेनपटेन
सहएकस्मिन्ततौसमवेतत्वात्तंतुरूपंपटगतरूपस्य असमवायिकारण
मित्यर्थः ॥ निमित्तकारणं लक्षयति ॥ तदुभवेति ॥ समवाय्यसमवायिभिन्न
कारणं निमित्तकारणमित्यर्थः ॥ करणलक्षणमुपसंहरति ॥ सदेतदिति ।
प्रत्यक्षलक्षणमाह ॥ तत्रेति ॥ प्रमाणचतुष्टयमध्ये इत्यर्थः । प्रत्यक्षज्ञानस्यल
क्षमाह ॥ इंद्रियेति । इंद्रियंचक्षुरादिकं अर्थोघटादिः । तयोः सन्निकर्षः
संयोगादिस्तज्जन्यज्ञानमित्यर्थः ॥ निर्विकल्पस्यलक्षमाह । निष्प्रकार
कविशेषणविशेष्यसंबंधानवगाहिज्ञानमित्यर्थः । ननुनिर्विकल्पके किंप्र
माणमितिचेन्न ॥ गौरितिविशिष्टज्ञानविषणज्ञानजन्यं । विशिष्टज्ञानत्वात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंजीति ज्ञानवत्। इत्यनुमानस्य प्रमाणत्वात्। विशेषणज्ञानस्यापि सविकल्पक
त्वे अनवस्थाप्रसंगात्। निर्विकल्पकसिद्धिः॥ सविकल्पकं लक्षयति॥ सप्र
कारकमिति॥ नामजात्यादिविशेषणविशेष्यसंबंधावगाहिज्ञानमित्यर्थः॥
सविकल्पकमुदाहरति॥ यथेति॥ इंद्रियार्थसन्निकर्षं विभजते॥ प्रत्यक्षेति॥
संयोगसन्निकर्षमुदाहरति॥ चक्षुषेति॥ द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्नि
कर्ष इत्यर्थः॥ आत्मा मनसा संयुज्यते मन इंद्रियेण इंद्रियमर्थेन ततः प्रत्य
क्षज्ञानमुत्पद्यते॥ संयुक्तसमवायमुदाहरति॥ घटरूपेति॥ संयुक्तसमवे
तसमवायमुदाहरति॥ रूपत्वेति॥ समवायमुदाहरति॥ श्रोत्रेति॥ तदुपपा
दयति॥ कर्णेति॥ ननु दूरस्थशब्दस्य कथं श्रोत्रसंबंध इति चेन्न॥ वीची
तरंगन्यायेन कदंबमुकुलन्यायेन वा शब्दोत्पत्तिक्रमेण दूरदेशे जातस्य
श्रोत्रसंबंधात्प्रत्यक्षत्वसंभवात्॥ समवेतसमवायमुदाहरति॥ शब्दत्वेति॥

॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विशेषण विशेष्य भावमुदाहरति ॥ अभावेति ॥ तदुपपादयति ॥ घटाभाव
वदिति ॥ भूतले घटोनास्तीत्यत्र अभावस्य विशेष्यत्वं द्रष्टव्यं ॥ एतेनानु
पलब्धेः प्रमाणांतरत्वं निरस्तं ॥ यत्र यत्र घटो भविष्यन् तत्राभूतलमिवाल
स्येन । दृश्यानाभावान्नास्तीति तर्कित प्रतियोगिसहचरितो ध्यनुपलब्धि
सहकृतेंद्रियेणैव अभावज्ञानोत्पत्तौ अनुपलब्धेः प्रमाणांतरत्वासंभ
वात् । अधिकरणज्ञानार्थमपेक्षणीयेंद्रियस्येव करणत्वोपपत्तौ अनु
पलब्धेः करणत्वस्य अयुक्तत्वात् ॥ विशेषण विशेष्य भावो विशेषण वि
शेष्योभयस्वरूपैवनातिरिक्तः संबंधः ॥ प्रसज्यज्ञानमुपसंहरन् त
स्यकरणमाह ॥ एवमिति ॥ असाधारणकारणत्वात् । इंद्रियप्रसज्यज्ञान
कारणमित्यर्थः ॥ प्रसज्यमुपसंहरति ॥ तस्मादिति ॥ ५ ॥ अनुमानंव्याख्याति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३॥

अनुमितिकरणमिति ॥ अनुमितेर्लक्षणमाह । परामर्शेति ॥ ननु संशयोत्तरप्रत्य
क्षेऽतिव्याप्तिः स्थाणुपुरुषसंशयानंतरं पुरुषत्वव्याप्यकरादिमानयमिति प
रामर्शेसति पुरुष एवेति प्रत्यक्षजननात् । न च तत्र अनुमितिरेवेति वाच्यं । पुरुषं
साक्षात्करोमीत्यनुव्यवसायविरोधादिति चेन्न ॥ पक्षतासहकृतपरामर्श
जन्यत्वस्य विवक्षितत्वात् ॥ सिसाधयिषाविरहसहकृतसिध्यभावः पक्षता
साध्यसिद्धिरनुमितिप्रतिबंधका । सिद्धिसत्वेप्यनुमितुयामीति इच्छायामनु
मितिदर्शनात् । सिसाधयिषोत्तिका ॥ ततश्चोत्तेजकाभावविशिष्टमण्यभावस्य
दाहकारणत्ववत् सिसाधयिषाविरहसहकृतसिध्यभावस्यपि अनुमिति
कारणत्वं ॥ परामर्शं लक्षयति ॥ व्याप्तीति ॥ व्याप्तिविषयकं यत् पक्षधर्मता
ज्ञानं तत्परामर्श इत्यर्थः ॥ परामर्शमभिनीय दर्शयति ॥ यथेति ॥ अनुमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मभिनीय दर्शयति:॥ तज्जन्य मिति॥ परामर्शजन्य मित्यर्थः। व्याप्तेर्लक्षणमा
ह॥ यत्रेति॥ यत्र धूमइतिव्याप्तिरभिनयः॥ साहचर्यनियमइतिलक्षणं॥
साहचर्यंसामानाधिकरण्यंतस्यनियमः॥ हेतिमानाधिकारणात्यंताभावाप्रति
योगिसाध्यसमानाधिकरण्यव्याप्तिः॥ यस्यधर्मत्वास्यरूपमाह॥ व्याप्यस्येति॥
स्वार्थानुमितिंदर्शयति॥ स्वयमेवभूयोदर्शनेनेति॥ ननुपार्थिवत्वलोहलेख्य
त्वादीशतदाःसहचारदर्शनेपिव्यभिचारोपलब्धेः॥ भूयोदर्शनेनकथंव्या
प्तिग्रहइतिचेन्न॥ व्यभिचारिज्ञानविरहसहकृतसहचारज्ञानस्यव्याप्ति
ग्राहकत्वात्॥ व्यभिचारिज्ञानंद्विविधं॥ निश्चयःशंकाच॥ तद्विरहःक्व
चित्तूचलर्कीतूक्वचित्स्यतःसिद्धएव। धूमाग्न्योर्व्याप्तिग्रहेकार्यकारणभा
वभंगप्रसंगलक्षणस्तर्कःव्यभिचारशंकानिवर्तकः॥ ननुसकलवह्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४॥

धूमयोस्सन्निकर्षात्कथं व्याप्तिग्रह इति चेन्न ॥ धूमत्ववह्निस्वरूपमान्यप्रत्या सा१
सत्यासकलधूमवह्निज्ञानसंभावात् ॥ तस्मादिति ॥ लिंगपरामर्शादित्यर्थः ॥
पारार्थानुमानमाह ॥ यत्त्विति ॥ यच्छब्दस्य तत्परार्थानुमानमिति तच्छब्देना
न्वयः ॥ पंचावयववाक्यमाह ॥ यथेति ॥ अवयवस्वरूपमाह ॥ प्रतिज्ञेति ॥
वा५ उदाहृतवाक्ये प्रतिज्ञादिविभागमाह ॥ पर्वतो वह्निमानिति ॥ साध्यवत्तया प
क्षवचनं प्रतिज्ञा ॥ पंचम्यंतं लिंगप्रतिपादकं हेतुः ॥ व्याप्तिप्रतिपादकमुदा
हरणं ॥ पक्षधर्मताज्ञानमुपनयः ॥ अबाधितत्वादिकं निगमनप्रयोजनं ॥
अनुमितिकरणमाह ॥ स्वार्थेति ॥ ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्या
मेवानुमितिसंभवे विशिष्टपरामर्शः किमर्थमंगीकर्तव्यमिति चेन्न ॥
मी२ वह्निव्याप्यधूमवानयमिति शाब्दपरामर्शस्थले परामर्शस्यावश्यकतया
लाघवेन सर्वत्र परामर्शस्यैव करणत्वात् । परामर्शद्वारा व्याप्तिज्ञानकारणं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिंगंनकरणं॥ अलीतादौव्यभिचारात्॥ व्यापारवत्कारणंकारणमितिमतेप
रामर्शद्वाराव्याप्तिज्ञानकारणं॥ तज्जन्यत्वेसतितज्जन्यजनकोव्यापारः॥
अनुमानमुपसंहरति॥ तस्मादिति॥ लिंगविभजते॥ लिंगमितिः॥ अन्वयव्य
तिरेकिंलक्षयति॥ अन्वयमिति॥ हेतुसाध्ययोर्व्याप्तिः अन्वयव्याप्तिः॥ तदभा
वःयोव्याप्तिः व्यतिरेकव्याप्तिः॥ केवलान्वयिनोलक्षमाह॥ अन्वयेति॥
केवलान्वयिसाध्यकंलिंगंकेवलान्वयि॥ अत्यंताभावाप्रतियोगित्वंकेवला
न्वयित्वं॥ ईश्वरप्रमाविषयत्वंसर्वपदार्थाभिधेयत्वंचसत्वास्तीतिव्यतिरे
काभावः॥ व्यतिरेकिणमुदाहरति॥ पृथिवीति॥ ननुइतरभेदःप्रसिद्धोवा
नवा॥ अद्येयत्वप्रसिद्धःलक्षहेतुसत्वेअन्वयित्व॥ असत्वेअसाधारण्यं॥ द्विती
येसाध्यज्ञानाभावात्कथंतद्विशिष्टानुमितिः॥ विशेषणज्ञानाभावेविशिष्टज्ञा
नानुदयात्॥ प्रतियोगिज्ञानाभावात्व्यतिरेकिव्याप्तिज्ञानमपिनस्यादिति
चेन्न॥ अलावयोदशान्योन्याभावानांचयोदशसुत्वेकंप्रसिद्धान्मेलनेपृथिव्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साध्यते। त्रयोदशत्वावच्छिन्नसाध्यस्य एकाधिकरणवृत्तित्वाभावात्॥ नान्वयित्वासा
धारण्ये साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति व्यतिरेकव्याप्तिनिरूप
णं चेति॥ पक्षलक्षणमाह॥ संदिग्धेति॥ संदिग्धेति। ननु श्रवणानंतरं भाविम
ननस्थले अव्याप्तिः। तत्र वेदवाक्यैरात्मनो निश्चितत्वेन संदेहाभावात्। किंच
प्रत्यक्षेपि वह्नौ यत्रेच्छया अनुमितिः। तत्राव्याप्तिरिति चेन्न। उक्तपक्षताश्रयत्व
स्य पक्षलक्षणत्वात्॥ सपक्षलक्षणमाह॥ निश्चितेति॥ विपक्षलक्षणमाह। नि
श्चितसाध्यति॥ एवं सद्धेतुं निरूप्य असद्धेतुं निरूपयितुं विभजते। सव्यभिचा
(रं विभजते।) रेति॥ अनुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषयत्वं हे
त्वाभासत्वं। सव्यभिचारं विभजते॥ स त्रिविध इति। साधारणं लक्षयति। तत्रे
ति। साधारणमनैकांतिकं उदाहरति॥ यथेति॥ आसाधारणं लक्षयति।
सर्वेति॥ अनुपसंहारिणो लक्षणमाह। अन्वयेति। विरुद्धं लक्षयति। साध्ये
ति। सत्प्रतिपक्षं लक्षयति। यस्येति। असिद्धं विभजते। असिद्धस्त्रिविध इति।

॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आश्रयासिद्धमुदाहरति। गगनेति। स्वरूपासिद्धमुदाहरति। शब्द इति। व्याप्य
त्वासिद्धस्य लक्षणमाह। सोपाधिक इति। उपाधिलक्षणमाह। साध्येति। उपाधि
श्चतिर्विधः॥ केवलसाध्यव्यापकः। पक्षधर्मावच्छिन्नसाध्यव्यापकः। साधानावच्छि
न्नसाध्यव्यापकः। उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति॥ आद्यः॥ आर्द्रेंध
नसंयोगः। द्वितीयो यथा। वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र बहिरिंद्रियद्रव्यत्वा
वच्छिन्नप्रत्यक्षत्वव्यापकं उद्भूतरूपवत्त्वं तृतीयो यथा॥ ध्वंसो विनाशी जन्यत्वात्।
इत्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकभावत्वं। चतुर्थस्तु। अत्यंताभावो विनाशी
प्रमेयत्वात्। इत्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं॥ बाधितस्य लक्षणमाह।
यस्येति॥ अत्र बाधस्य ग्राह्यभावनिश्चयत्वेन। सहातिपक्षस्य विरोधिज्ञानसा
मग्रीत्वेन साक्षादनुमितिप्रतिबंधकत्वं। इतरेषां तु परामर्शप्रतिबंधकत्वं। तत्रापि
साधारणस्याव्यभिचाराभावतया। विरुध्यसामानाधिकरण्याभावतया।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६॥

व्याप्यत्वासिद्धस्य विशिष्टव्याप्त्यभावतया। असाधारिणानुपसंहरिणोः व्याप्ति
संशयाधारकत्वेन व्याप्तिज्ञानप्रतिबंधकत्वं। आश्रयासिद्धिस्वरूपासिध्योः प
क्षधर्मताज्ञानप्रतिबंधकत्वं। उपाधिस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबं
धकः। सिद्धसाधनं तु पक्षताविघटकतया। आश्रयासिद्धांतर्भवति। निग्रहस्था
नांतरमिति नवीनाः॥६॥ उपमानं लक्षयति॥ उपमितीति॥ शब्दं लक्षयति॥ आ
प्तेति॥ शब्दस्य लक्षणमाह॥ शक्तमिति॥ अर्थस्मृत्यनुकूलपदपदार्थसंबंधः श
क्तिरिति: सा च पदार्थांतरमिति मीमांसकः तन्निरासार्थमाह॥ अस्मादिति॥ डि
त्थादीनामिव घटादीनां संकेत एव शक्तिः। न तु पदार्थांतरमित्यर्थः। ननु गवादिपद
र्थानां जातावेव शक्तिः। विशेषणतया जातेः प्रथममुपस्थितत्वात्। व्यक्तिलाभस्तु
आक्षेपादिना इति केचित्। तन्न। गामानयेत्यादौ वृद्धव्यवहारे सर्वत्रानयनादेर्व्य
क्तावेव संभवेन जातिविशिष्टव्यक्तावेव शक्तिकल्पनात्॥ शक्तिग्रहश्च वृद्धव्यव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरेण। तथाहि॥ व्युत्पत्सुर्बालो गामानयेत्युत्तमवृद्धस्य वाक्यश्रवणानंतरं मध्य
मवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकाज्ञानस्य अन्व
यव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य अश्वमानय गां बंधानेति वाक्यांतरगोप
दस्य गोत्वविशिष्टे शक्तिः अश्वपदस्य अश्वत्वविशिष्टे इति व्युत्पद्यते॥ ननु सर्वत्र
कार्यपरत्वात् व्यवहारस्य कार्यपरवाक्य एव व्युत्पत्तिः। न तु सिद्धपर इति चेन्न॥
काश्यां त्रिभुवनतिलको भूपतिरित्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेपि म
धुकारादिव्युत्पत्तिदर्शनात् च वृत्तिश्च द्विविधा। शक्तिर्लक्षणा चेति॥ लक्ष
णापि शब्दवृत्तिः। शक्यसंबंधो लक्षणा॥ यथा। गंगायां घोष इत्यत्र गंगापदवा
च्यप्रवाहसंबंधादेव तीरोपस्थितौ तीरेपि शक्तिर्न कल्प्यते। सौंधवादौ लवणाश्व
योः परस्परसंबंधाभावात् नानाशक्तिकल्पनं॥ लक्षणा त्रिविधा॥ जहल्लक्षणा॥
जहदजहल्लक्षणा। यत्र वाच्यार्थस्य अन्वयाभावः। तत्र जहति। यथा मंचा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रोशंतीति। यत्र वाच्यर्थस्य अन्वयः। तत्र अजहतीयथा॥ छत्रिणो गच्छंति॥
यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः॥ तत्र जहदजहतीयथा। तत्त्वमसीति।
गौण्यपि लक्षणैव॥ लक्ष्यमाणगुणसंबंधरूपा। यथा अग्निर्माणवक इति॥
व्यंजना शक्तिलक्षणांतर्भूता॥ अर्थशक्तिमूला च॥ अथवा अनुमानादिना अ
न्यथा सिद्धा अन्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा लक्षणाबीजं॥ तत्प्रतीतीच्छ
या उच्चरितत्वं तात्पर्यं। तात्पर्यज्ञानं वाक्यार्थज्ञाने हेतुः। नानार्थानुरोधात् प्रका
रणादिकं तात्पर्यग्राहकं। द्वारमित्यादौ पिधेहीति शब्दाध्याहारः॥ ननु अर्थ
ज्ञानार्थत्वात् शब्दस्यार्थमविज्ञाय शब्दाध्याहारसंभावात्। अर्थाध्याहार ए
व युक्त इति चेन्न॥ पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञानहेतुत्वात्। अ
न्यथा घटः कर्मत्वं आनयनं कृतिरित्यत्रापि शाब्दज्ञानप्रसंगात्। पंकजादिपदे
षु योगरूढिः॥ अवयवशक्तिर्योगिः। समुदायशक्तिरूढः। नियतपद्मत्वज्ञानो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थसमुदायशक्तिः।अन्यथाकुमुदेपिप्रयोगप्रसंगः इतरान्वितेशक्तिरितिप्रभाक
राः।अन्वयस्यैकार्थतयाभानप्रसंगात्। अन्वयांशेपिशक्तिर्नकल्पनीयेतिगौ
तमीयाः।आकांक्षेति।आकांक्षादिज्ञानमित्यर्थः। अन्यथाआकांक्षादि
भ्रमाच्छब्दभ्रमोनस्यात्।आकांक्षालक्षयतिं।पदस्येति।योग्यतालक्ष
णमाह।अर्थेति।सन्निधिलक्षणमाह।पदानामिति। अविलंबेनय
दर्थोपस्थितिःसन्निधिः।उच्चारणंतुतदुपयोगितयाउक्तं।शोरश्व
इति।घटःकर्मत्वमित्यनाकांक्षोदाहरणंद्रष्टव्यं।वैदिकस्यविशेषमाह।
वैदिकमीश्वरोक्तत्वादिति।ननुवेदस्यानादित्वाकथमीश्वरोक्तमिति
चेन्नावेदःपौरुषेयःवाक्यसमूहत्वात्।भारतादिवत्।नचस्मर्यमा
णकर्तृकमुपाधिःगोतमादिशिष्यपरंपरयावेदेपिकर्तृस्मरणेनसाध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥

न व्यापकत्वात् ॥ तस्मात्तेपानात् त्रयो वेदा अजायंत इति श्रुतेश्च ॥ ननु
वर्णा नित्याः स एवायं गकार इति प्रत्यभिज्ञाबलात् ॥ तथा च वेदस्य
अनित्यत्वं कथमिति चेन्न । उत्पन्नो गकारो नष्टो गकार इति प्रत्यभिज्ञा तीत्या
वर्णानां अनित्यत्वात् ॥ सोयं सकार इति प्रत्यभिज्ञायाः सेयं दीपज्वालेति
वत् जात्यालंबनात् । वर्णानां नित्यत्वेपि आनुपूर्वीविशिष्टवाक्यस्या
नित्यत्वाच्च । तस्मादीश्वरोक्तो वेदः । मन्वादिस्मृतीनां आचाराणां च वेद
मूलकतया प्रामाण्यं । स्मृतिमूलभूतवाक्यानां इदानीमनध्ययनात् ।
तन्मूलभूताकाचिच्छाखोच्छिन्नेति कल्प्यते ॥ ननु पठ्यमानवेदवाक्यो
त्सादस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्यायुक्तत्वात् । नित्यानु
मेयो वेदो मूलमिति चेन्न ॥ तथापि वर्णानुपूर्वीज्ञानाभावेन बोधकत्वासं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवात्॥ नन्वेतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि॥ आकांक्षादि
मत्पदकदंबकत्वात्॥ मद्वाक्यवत्॥ इत्यनुमानादेव संसर्गज्ञानसंभवा
इति तूशब्दो न प्रमाणांतरमिति चेन्न॥ अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्ष
णस्य शब्दात्प्रत्येमीत्यनुव्यवसायसाक्षिकस्य सर्वसंमतत्वात्॥ नन्वर्था
पत्तिरपि प्रमाणांतरमस्ति पीनो देवदत्तो दिवा न भुंक्त इति दृष्टे श्रुते वा
पीनत्वान्यथानुपपत्त्या रात्रिभोजनं अर्थापत्त्या कल्प्यत इति चेन्न॥ देव
दत्तो रात्रौ भुंक्ते दिवा भुजानत्वे सति पीनत्वादित्यनुमानेनैव रात्रिभोजनस्य
सिद्धत्वात्। शते पंचाशदिति संभवोप्यनुमानस्पष्टमेव॥ इह वटे यक्ष
स्तिष्ठतीत्यैतिह्यमपि अज्ञातमूलवल्लकशब्द एव॥ चेष्टापि शब्दानुमा
नद्वारा व्यवहारहेतुरिति न प्रमाणांतरं॥ तस्मात्प्रत्यक्षानुमानउपमान

त ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शब्दाश्च त्वार्येव प्रमाण्यैतैणानि ॥ ज्ञानानां तद्वति तत्प्रकारकत्वं प्रामाण्यं ॥
स्वतो ग्राह्यं परतो वेति विचार्यते । तत्र विप्रतिपत्तिः ॥ ज्ञानप्रामाण्यं तदप्रामा
ण्याग्राहकयावत् ज्ञानग्राहकसामग्रीग्राह्यं न वा वा ॥ अत्र विधिकोटिः स्व
तस्त्वं । निषेधकोटिः परतस्त्वं ॥ अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय या
वदिति ॥ इदं ज्ञानं अप्रमेति ज्ञानेन प्रामाण्याग्राहात् बाधवारणाय प्रामा
ण्याग्राहकेति ॥ इदं ज्ञानमप्रमेति ज्ञानं प्रमाइयुनुव्यवसायनिष्ठप्रामाण्यग्राह
कस्य अप्रामाण्याग्राहकत्वाभावात्स्वतस्त्वं न स्यात् ॥ अतस्तदिति ॥ तस्मि
न्ग्राह्यप्रामाण्याश्रये अप्रामाण्याग्राहकेत्यर्थः ॥ उदाहृतस्थले अप्रामाण्यग्रा
हकस्यापि अनुव्यवसाये तदग्राहकत्वात्स्वतस्त्वसिद्धिः ॥ ननु स्वत एव प्रा
माण्यं गृह्यते । घटमहं जानामीत्यनुव्यवसायेन घटघटत्वयोरिव तत्संबं
धस्यापि विषयीकरणात् ॥ व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् ॥ रीपुवर्त्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निप्रकारसंबंधस्येवप्रमात्वयदर्थत्वात्इतिचेन्न॥स्वतःप्रामाण्यग्रहे
जलज्ञानंप्रमानवेयनभ्यासदशायांप्रमातेसंशयोनस्यात्अनुव्यवसा
येनप्रामाण्यस्यनिश्चितत्वात्।तस्मात्स्वतोग्राह्यत्वभावात्परतोग्रा
ह्यत्वं॥तथाहिप्रथमंहिजलज्ञानानंतरंप्रवृत्तौसत्यांजलत्वामेसतिपूर्वो
त्पन्नजलज्ञानंप्रमा।समर्थप्रवृत्तिजनकत्वात्।यन्नैवंतन्नैवंयथाभ्रमे
तिरेकिणाप्रमात्वंनिश्चीयते॥द्वितीयादिज्ञानेषुपूर्वज्ञानदृष्टांत
नत्वसजातीयलिंगेनअन्वयव्यतिरेकिणाविगृह्यते॥प्रमायाःगुणज
न्यत्वंउत्तौपरतस्त्वं॥प्रमासाधारणकारणंगुणः।अप्रमासाधारणका
रणंदोषः।तत्रयत्यस्मिंविशेषणवत्विशेष्यसन्निकर्षोगुणः।अनुमितौ
व्यापकत्वनिश्चायकत्वज्ञानं॥उपमितौयथार्थसादृश्यज्ञानं।शाब्दज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेयथार्थयोग्यताज्ञानं॥इच्छेहनीनं॥पुरोवर्त्तिनिप्रकाराभावस्यानुव्य
वसायेनअनुपस्थितत्वात्॥अप्रमात्वंपरतएवग्रह्यते॥पित्तादिदोष
जन्यत्वादुक्तौपरतस्त्वं॥ननुसर्वज्ञानानांयथार्थत्वात्॥अयथार्थज्ञान
मेवनास्ति॥नचशुक्तौविदंरजतमितिज्ञानात्प्रवृत्तिदर्शनादन्यथा
ख्यातिरितिवाच्यं॥रजतस्मृतिपुरोवर्त्तिज्ञानाभ्यामेवप्रवृत्तिसंभ
वात्॥उपस्थितेष्टभेदाग्रहस्यैवसर्वत्रप्रवर्त्तकत्वेननेदंरजतमित्या
दावतिप्रसंगाभावादितिचेन्न॥सत्यरजतस्थलेपुरोवर्त्तिविशेष्यक
रजतत्वप्रकारकज्ञानस्यलाघवेनप्रवृत्तिजनकतयाशुक्तावपिरज
तत्वप्रवृत्तिजनकत्वेनविशिष्टज्ञानस्यैवकल्पनात्॥अयथार्थानुभव
विभजते॥अयथार्थेति॥स्वप्नस्यमानसविपर्ययरूपत्वात्नत्रैविध्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विरोधः ॥ संशयलक्षणमाह ॥ एकेति ॥ घटपटाविति समूहालंब
ने अतिव्याप्तिवारणाय एकेति ॥ घटो द्रव्यमित्यादावतिव्याप्तिवा
रणाय विरुद्धेति: पटत्वविरुद्धघटत्ववानित्यत्रातिव्याप्तिवारणाय
नानेति ॥ विपर्ययलक्षणमाह ॥ मिथ्येति ॥ तदभाववति तत्प्रकारकनि
श्चय इत्यर्थः ॥ तर्कं लक्षयति ॥ व्याप्येति ॥ यद्यपि तर्क्ये विपर्ययांतर्भवति ।
तथापि प्रमाण्यानुग्राहकत्वाद्भेदकथनं । स्मृतिं विभजते । स्मृतिरिति ॥
सुखलक्षयति ॥ सर्वेषमिति ॥ सुख्यहमित्याद्यनुव्यवसायगम्यसु
खत्वादिकमेव लक्षणं ॥ यथा ॥ श्रुतं तु स्वरूपकथनमेवेति द्रष्टव्यं ।
संस्कारं विभजते । संस्कार इति । संस्कारत्वं जातिमान् संस्कारः ।
वेगस्याश्रयमाह । वेग इति वेगत्वजातिमान् वेगः ॥ भावनां लक्षय
ति ॥ अनुभवेति ॥ आत्मादावतिव्याप्तिवारणाय अनुभवजन्य इति ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुभवध्वंसेऽतिव्याप्तिवारणायस्मृतीति॥स्मृतेरपिसंस्कारजन्य
त्वमितिनवीनेहक्तं।स्थितस्थापकंलक्षयति।अन्यथेति॥संख्यादय
श्चैनैमित्तिकद्रवत्ववेगस्थितिस्थापकाःसामान्यगुणाः।अन्येरूपा
दयोविशेषगुणाः॥द्रव्यविभाजकोपाधिद्वयसमानाधिकारणा
वृत्तिजातिमत्वंविशेषगुणत्वं।कर्मणोलक्षणमाह॥चलनेति।उत्क्षे
पणादीनांकार्यभेदमाह।उर्ध्वेति॥शरीरेति।वक्रतासंयोगकमाकुंच
नं।ऋजुतासंयोगकंप्रसारणमित्यर्थः।सामान्यंलक्षयति।नित्यमिति।
परमाणुपरिमाणादौअतिव्याप्तिवारणायअनेकेति।संयोगाद्भाव
तिव्याप्तिवारणायनित्यमिति।अनुगतबुद्धिसमवेतत्वं॥तेननाभावा
द्भावतिव्याप्तिः।विशेषंलक्षयति।नित्येति।समवायंलक्षयतिनित्यइति।

नि १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संयोगेऽतिव्याप्तिवारणाय नित्य इति। आकाशादावतिव्याप्तिवारणायसं
बंध इति। अयुतसिद्धलक्षणमाह॥ ययोरिति। ननुसमवायसद्भावे किंप्र
माणमित्यत्रान्न॥ नीलोघट इति विशिष्टबुद्धिः। विशेषणविशेष्यसंबंध
विषया॥ विशिष्टमसत्त्वात्। दंडीतिप्रत्ययवदिति अनुमानेनसमवाय सि
द्धिः। अवयवावयविनोरिति। द्रव्यसमवायिकारणमवयवः। अन्यद्रव्यमव
यवि। प्रागभावंलक्षयति। अनादिरिति॥ आकाशादावतिव्याप्तिवारणा
यसांतइति॥ घटादावतिव्याप्तिवारणायअनादिरिति। प्रतियोगिसमवा
यिकारणवृत्तिः प्रतियोगिजनकः भविष्यतीतिव्यवहारहेतुः। प्रागभावः।
ध्वंसंलक्षयति। सादिरिति। घटादावतिव्याप्तिवारणायअनंतइति। आ
काशादावतिव्याप्तिवारणायसादिरिति। प्रतियोगिजन्यः प्रतियोगिस
मवायिकारणवृत्तिः। ध्वस्तइतिव्यवहारहेतुर्ध्वंसः। असतोभावलक्षयति।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रैकालिक इति। अन्योन्याभावे अतिव्याप्तिवारणाय संसर्गावच्छिन्नेति। ध्वं
सप्रागभावयोरपि अतिव्याप्तिवारणाय त्रैकालिकेति। अन्योन्याभावं लक्षयति।
तादात्म्येति। प्रतियोगितावच्छेदकसंसर्गावच्छेदकभेदादेकप्रतियोगिकयोरत्यं
ताभावा। न्योन्याभावयोर्बहुत्वं॥ केवलदेवदत्ताद्यभावाद्वंउयभाव इति प्रतीत्या वि
शिष्टाभावः। एवसत्वे द्वौ नस्त इति प्रतीत्या द्वित्वावच्छिन्नाभावः। संयोगसंबंधे
न घटवति भूतले समवायसंबंधेन घटाभावः। तत्तद्घटाभावात् घटत्वावच्छिन्नप्र
तियोगिकसामान्याभावश्चातिरिक्तः। एवमन्योन्याभावोपि॥ घटत्वावच्छिन्नप
टो नास्तीति व्यधिकरणधर्मावच्छिन्नाभावो नांगीक्रियते। पटे घटत्वं नास्तीति त
स्यार्थः। अतिरिक्तत्वेत्यकेवलान्वयि। सामयिकाभावोप्यत्यंताभाव एव। सम
यविशेषे प्रतीयमानः सामयिकाभावः॥ घटाभाववति घटानयनेत्यंताभावस्या
न्यत्र गमनाभावेपि अप्रतीतेः। घटापसरणे सति प्रतीतेः॥ भूतलघटसंयोग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रागभावध्वंसयोरत्यंताभावप्रतीतिनियामकत्वं कल्प्यते। घटवति संयोगप्राग
भावध्वंसयोरसत्वादन्यत्रात्यंताभावस्याप्रतीतिः। घटापसरणे च संयोगध्वं
ससत्वात्प्रतीतिरिति। केवलाधिकरणादेव नास्तीति व्यवहारोपपत्तौ नाभा
वः पदार्थांतरमिति गुरवः तन्न। अभावानंगीकारे कैवल्यस्य निर्वक्तुमशक्य
त्वात्। अभावाभावो भाव एव नातिरिक्त इति प्रांचः। अनवस्थाप्रसंगात्। ध्वंस
प्रागभावः प्रागभावध्वंसश्च प्रतियोग्येव। आभावाभावोतिरिक्त एव। तृतीयाभा
वस्य प्रथमत्वात्। नानवस्थेति नवीनाः। ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टांत
तसिद्धांतावयवतर्कवादनिर्णयजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्था
नानां तत्वज्ञानाभिः श्रेयसाधिगम इति न्यायसूत्रे षोडशपदार्थानां उक्तत्वात् क
थं सप्तैवेत्यत आह॥ सर्वेषामिति॥ सर्वेषां सप्तस्वेवांतर्भाव इत्यर्थः॥ आत्मशरीरे
द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति द्वाद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शविधं प्रमेयं ॥ प्रवृत्तिर्धर्माधर्मौ रागद्वेषमोहाः दोषाः ॥ राग इच्छा ॥ द्वेषमन्युः ।
मोहः शरीरादावात्मभ्रमः । प्रेत्यभावो मरणं । फलं भोगः । अपवर्गो मोक्षः । स च
स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः । प्रयोजनं सु
खं दुःखहानिश्च ॥ दृष्टांतो माहानसादिः ॥ प्रामाणिकत्वेनाभ्युपगतोर्थः सिद्धांतः ।
निर्णयो निश्चयः । प्रमाणफलं । तत्त्वबुभुत्सोः कथावादः । उभयसाधनवति वि
जिगीषुकथा जल्पः ॥ स्वपक्षस्थापनहीना वितंडा ॥ कथानोमनानाकूतकः प
र्वोत्तरपक्षवाक्यसंदर्भः । अभिप्रायांतरेण प्रयुक्तस्य अर्थांतरप्रकल्प्य दूषणं छलं ॥
असदुत्तरं जातिः । साधर्म्यवैधर्म्यउत्कर्षाप्रवर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्ति
प्रसंगप्रतिदृष्टांत अनुत्पत्तिसमवायं प्रकरणं हेत्वर्थापत्त्यविशेषोपलब्ध्यनुपलब्धि
कारणनित्यानित्यकार्यसमाजातयः ॥ वादिनोपजयहेतुर्निग्रहस्थानं । प्रतिज्ञा
हानिः ॥ प्रतिज्ञांतरं प्रतिज्ञाविरोधः ॥ प्रतिज्ञासन्यासः । हेत्वंतरं ॥ अर्थांतरं । नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रर्थकं ॥ अविज्ञातार्थं अपार्थकं ॥ अप्राप्तकलं न्युनं । अधिकं । पुनरुक्तं । अननुभाष
णं । अप्रतिभा विक्षेपः । मत्तानुज्ञा । पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः । अ
पसिद्धांतः । हेत्वाभासश्च निग्रहस्थानानि शेषं सुगमं ननु करतलानलसंयोगे
सत्यपि प्रतिबंधके सति दाहानुत्पत्तेः तदभावे तस्मिन्नुत्पत्तेः शक्तिः पदार्थांति
रमिति चेन्न । प्रतिबंधकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात्
कारणस्यैव शक्तिपदार्थत्वात् ननु भस्मादिना कांस्यादौ शुद्धिदर्शनादाधेयश
क्तिरंगीकार्येति चेन्न । भस्मादिसंयोगसमानकालीनअस्पृश्यस्पर्शप्रति
योगिकयावदभावसहितभस्मादिसंयोगध्वंसस्य शुद्धिपदार्थत्वात् ॥ स्वत्व
मपि न पदार्थांतरं यथेष्टविनियोगयोग्यत्वस्य स्वस्वस्वरूपत्वात् तदेवच्छद
कं च प्रतिग्रहादिलब्धत्वमेवेति ॥ अथ विधिर्निरूप्यते ॥ प्रयत्नं च जनकचिकी
र्षाजनकज्ञानविषयो । विधिः । तत्प्रतिपादको । लिंगादिर्वा ॥ कृत्यसाध्ये प्रवृ
त्त्यसाध्ये दर्शनात् कृति । साध्यसाज्ञानं प्रवर्तकं न च विषभक्षणादौ प्रवृत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रसंगः इष्टसाधनत्वालिंगक कृतिसाध्यताज्ञानस्य काम्यस्थले। विहितकालशुचि
जीवित्वनिमित्तज्ञानजन्यस्य नित्यनैमित्तिकस्थले प्रवर्त्तकत्वात्। न चाननुगमः॥ स्ववि
शेषणवत्ताप्रतिसंधानजन्यज्ञानत्वस्य अनुगतत्वादिति गुरवः॥ तन्न॥ लाघवेन कृति
साध्येष्टसाधनताज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात्। न च नित्येष्टसाधनता
भावादप्रवृत्तिप्रसंगः। तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्वकल्पनात्॥
तस्मात्कृतिसाध्येष्टसाधनत्वमेव लिंगार्थः॥ ननु ज्योतिष्टोमेन स्वर्गकामो यजे
तेत्यत्र लिंङा स्वर्गसाधनकार्यं प्रतीयते। यागस्याशुतरविनाशिनः कालांत
रभाविस्वर्गसाधनत्वायोगात्। तावत्कालस्थायी कार्यं अपूर्वमेव लिङर्थः।
कार्यकृतिसाध्यं। कृतेः सविषयत्वात्। विषयाकांक्षायां यागो विषयत्वेनान्वे
ति॥ कस्य कार्यमिति नियोज्याकांक्षायां स्वर्गकामपदं नियोज्यपरतयान्वे
ति॥ कार्यबोद्धा नियोज्यः॥ नेन ज्योतिष्टोमनामकयागविषयकं स्वर्गका

य ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मस्य कार्यमिति वाक्यार्थः संबध्यते। वैदिकलिङ्त्वात्। वयोज्जीवमग्नि
होत्रं जुहुयादिति नित्यवाक्ये अपूर्वमेव वमेकल्प्यते। आरोग्यकामो भैष
जपानं कुर्यादित्यादौ। लौकिकलिङः क्रियाकार्ये लक्षणेति चेन्न। या
गस्याप्यारोग्यतानिश्चयाभावेन साधनतायाः प्रतीत्यनंतरं निर्वाहार्थं
अवांतरव्यापारतया अपूर्वकल्पनात्। कीर्तनादिनानाशब्दैः न याग
ध्वंसो व्यापारः। लोकव्युत्पत्तिबलात् कृतायामेव कृतिसाधनत्वं लिङा बो
ध्यत इति लिङ्त्वेन विषयेण विध्यर्थत्वं। आख्यातत्वेन प्रयत्नार्थकत्वं पचति पाकं क
रोति विवरणदर्शनात्। किं करोतीति प्रश्नेन पचतीति उत्तराच्चाख्यातस्य प्र
यत्नार्थकत्वं पचतीति निश्चयात्। रथं गतीत्यादौ अनुकूलव्यापारे लक्षणा।
देवदत्तः पचति देवदत्तेन पच्यते तंडुल इत्यादौ कर्तृकर्मणोर्नाख्यातत्वं।

थो

५ साध्येष्ट ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंतु द्वैतैकत्वादीनामेव तयोराक्षेपादेव लाभः॥ प्रजयतीत्यादौ धातोरेव प्र
कर्षे शक्तिः। उपसर्गाणां द्योतकत्वमेव। न तत्र शक्तिरस्तीति। यदा ज्ञानस्य पर
मप्रयोजनं मोक्षः॥ तथा हि॥ आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासि
तव्यः इति श्रुत्या श्रवणादीनां साध्यतत्त्वबोधनात्। श्रुत्यादेहादिविलक्ष
णात्मज्ञाने सत्यपि असंभावान्निवृत्तेः॥ युक्त्यनुसंधनरूपमननसाध्यत्वात्।
मननोपयोगिपदार्थनिरूपण द्वारा शास्त्रस्यापि मोक्षोपयोगः। तदनंतरं श्रुत्यो
पदिष्टयोगविधिना निदिध्यासने कृते तदनंतरं देहादिविलक्षणात्मसाक्षात्का
रे सति देहादावहमित्यभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात्। प्रवृत्त्य
भावे धर्माधर्मयोरभावात्। जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमदुःख
ध्वंसलक्षणो मोक्षो जायते॥ ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेः। ज्ञान
मात्रसाध्यत्वात्। तमेव विद्वानमृत इह भवति नान्यः पंथा विद्यतेयनायेति साध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांतरनिषधाच्च। ननुतत्प्राप्तिहेतुर्विज्ञानंकर्मचोक्तंमहामुनेइतिकर्मणोमोक्षसाधनत्व
स्मरणात्। ज्ञानकर्मणोः समुच्चयइतिचेन्न। नित्यनैमित्तिकैरेवकुर्वाणोदुरितक्ष
यज्ञानंचविमलीकुर्वन्नभ्यासेनचपाचयेत्। अभ्यासात्त्यक्तविज्ञानंकैवल्यंलभ
तेनरइत्यादिनाकर्मणोज्ञानसाधनत्वप्रतिपादनात्। ज्ञानद्वारैवकर्ममोक्षसाध
नंनसाक्षात्। तस्मात्पदार्थज्ञानान्मोक्षः परमप्रयोजनमितिसर्वंरमणीयं॥ छ॥
इतिश्रीअन्नंभट्टोपाध्यायकृततर्कसंग्रहदीपिकासमाप्ता॥ शुभंभवतु॥ श्री
सांबार्पणमस्तु॥ छ॥ श्रीकृष्णपरमात्मानुसाहे॥ श्रीरामार्पनमस्तु॥ छ॥ छ॥ छ॥

K K S U LIBRARY
RAMTEK
441 106
M-1486
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.10.20 10:12
,TRANSFERRED=2020/10/20 at 10:20:44
,PAGES=50
,TYPE=STD
,NAME=S0004201
,Book Name=M-1486-TARKSANGRAH DIPIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection